**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN(o): 2581-6241
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 6.471
Volume - 6, Issue - 8, August - 2023 Publication Date: 31/08/2023

DOIs:10.2018/SS/202308014 --:-- Research Paper / Article / Review

# रत्नविज्ञानम् - सामान्यपरिचयः ।

**Soumini K R**
Research Scholar, Department of Sanskrit General, SSUS Kalady, Kerala, India.
Email - Souminikalappurakkal@gmail.com

**सारांशः-** प्रकृत्यां दृश्यमानानां प्रकाशमानानां वस्तूनामुपरि मनुष्यमनः सर्वथा आकर्षितमेव भवति । भौतिकानाम् अमूल्यवस्तूनां मध्ये रत्नं मूल्यवान् निधिः भवति। प्राचीनकालादारभ्य अर्वाचीनकालतोऽपि रत्नानामाकर्षकत्वं चिरमनुवर्तत एव। तेषां रत्नानां चित्ताकर्षकत्वेन, चिरस्थायीत्वेन, दुर्लतभतया च तेषामुपरि नृणां अभिनिवेशः वर्धत एव। रत्नशास्त्रः इतरशास्त्रवत् विपुल एव। रत्नसंख्या, रत्नवैशिष्ट्यम्, रत्नधारणम्, तत्धारणविधिः इत्याद्याः विषयाः अस्मिन् शास्त्रयुक्तया रीत्या प्रतिपादिताः। न केवलं भारते किन्तु देशान्तरेऽपि रत्नविषयसम्बन्धि अध्ययनम् अस्ति। भारते वैदिककालादेव रत्नस्योपयोगः आसीत्। वैदिके पौराणिके च वाङ्मये तथा आयुवेद- ज्योतिषादिषु शास्त्रेषु च रत्नानामुपरि परामर्शः सुलभतया द्रष्टुं शक्यते। तस्य सामान्यपरिचयः अत्र दीयते।

## १.आमुखः।

चतुष्षष्टिषु कलासु अन्यतमं भवति रत्नशास्त्रम्। वैदिककालादारभ्य रत्नानां प्रयोगः वर्तत इति दृष्टुं शक्यते। अस्माकं प्राचीनऋषयः , आचार्याः, शास्त्रकाराः, महाकवयः च स्वज्ञानेन रत्नानां महत्वम्, उपयोगसम्बद्धविषयाः च स्वग्रन्थेषु प्रतिपादयन्ति। अस्माकं पूर्विकाः रत्नशास्त्रे निपुणाः आसन्निति अनेन ज्ञातुं शक्यते। रत्नपरीक्षणेऽपि ते निपुणाः आसन्। अत एव प्राचीनग्रन्थेभ्यः रत्नशास्त्रसम्बन्धविषयाः सुलभतया लभ्यन्ते।

आधुनिकलोके रत्नशास्त्रः विपुलस्य अध्ययनस्य विषयीभूतः। किन्तु सामान्यजनानां मनसि तत्साकं रत्नविज्ञानसम्बन्धिन्यः मिथ्याधारणाः अपि वर्धन्ते। तासां निवारणाय तत्परविज्ञानस्य प्रसारणाय च रत्नसम्बन्धविषयाणामुपरि अध्ययनम् अवश्यमेव कर्तव्यम्।

## २. रत्नविज्ञानम् - सामान्यपरिचयः ।

निरुक्ते 'रमणीयानां धनानां दातृतमम्'[१] इति रत्नशब्दस्य अर्थः कल्पितः। उणादिकोशे 'रमयति हर्षयतीति रत्नम्'[२] इति च रत्नशब्दस्य व्युत्पत्तिः प्रदर्शिता। सिद्धान्तकौमुद्यनुसारेण 'रमयतीति रत्नम्' इति। भावप्रकाशमनुसृत्य 'रत्न'मिति पदस्य निरुक्तिः एवं भवति-

धनार्थिनो जनाः सवे रमन्तेऽस्मिन्नतीव यत्।
ततो रत्नमिति प्रोक्तं शब्दशास्त्रविशारदैः।।[३]

अतः सामान्यतया 'रत्न' शब्दस्य अर्थः 'रम्यते मनः अस्मिन् इति रत्नम्' इति वक्तुं शक्यते। कस्मिंश्चित् समुदाये श्रेष्ठतमं कमप्युद्दिश्यापि शब्दोऽयं प्रयुक्तः। यथा, स्त्रीरत्नम्, गजरत्नम् इत्यादि। किन्तु वैदिकनिघण्डौ रत्नशब्दः धनस्य पर्यायेषु वर्गीकृतः। वाचस्पत्ये 'रमतेऽत्र' इति रत्नशब्दस्य अर्थः कल्पितमस्ति।

अमरकोशे रत्न- मणि शब्दौ पर्यायौ स्तः। यथा- 'रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च।[४] हेमकोशमनुसृत्यापि रत्न -मणिशब्दौ समानार्थकौ एव।

लोके अष्टचत्वारींशमिताः रत्नाः सन्ति। तेषु माणिक्य- मुक्ता- प्रवाल- मरकत- पुष्यराग- वज्र- इन्द्रनील- गोमेदक- वैढूर्यमिति नवरत्नान्येव प्रसिद्धानि। एतदतिरिच्य स्फटिक- वैक्रान्त- कर्केतनादि उपरत्नान्यपि सन्ति। रत्नानामुपयोगः न केवलम् आभरणपरः अपि तु विविधव्याधिशमनाय, जातकसम्बद्धिदोषादिशमनाय च तेषामुपयोगः वर्त्तत एव। एवं ज्योतिष- आयुर्वेदादिशास्त्रेषु रत्नविज्ञानं महत्वपूर्णं स्थानम् आवहति। रत्नप्रभवानि किरणानि प्राणिषु हितेनाहितेन वा स्वप्रभावमाकलयन्तीति रत्नशास्त्राचार्याणां मतम्।

## वैदिकवाङ्मये रत्नानां प्रतिपादनम्।

विश्वस्य प्राचीनतमस्य ग्रन्थस्य प्रथमे मण्डले प्रथमे सूक्ते प्रथमे मन्त्रे अग्निः श्रेष्ठं रत्नमिति स्तूयते-

अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् ।
होतारं रत्नधातमम् ॥[५]

अनन्तरं तत्र सप्तरत्नानां प्रत्येक उल्लेखः विद्यते, यथा-

सोमारुद्राधायेथामसुर्यन् प्रवामिष्टयोरमश्नुवन्तु।
दमे दमे सप्तरत्नादधाना शन्नोभूतं द्विपदेशं चतुष्पते॥ इति।[६]

रत्नस्य महत्वं दर्शयति ऋग्वेदे यथा-

प्राता रत्नं प्रातरित्वा दधाति तं चिकित्वान् प्रतिगृह्या निधत्ते।
तेन प्रजां वर्धमानय अयू रायस्पोषेण सचते सुवीरः ॥[७]

अर्थात्, सूर्यः अखण्डज्ञानज्योतिप्रतीकः भवति। सः महान् दाता च, यतः उदयकाले स्वसाधकेभ्यः दिव्यं रमणीयं च धनं प्रयच्छति। अनन्तरं ऋवेदे तथा यजुर्वेदे अपि रत्नानां महत्वं दर्शयित्वा कथयति- 'देवेषु रत्नमभजन्त धीराः'[८] इति।

अथर्ववेदे रत्नानां प्रयोगम्, मणिधारणञ्चाधिकृत्य अनेके उल्लेखाः द्रष्टुं शक्यते। तत्र वरणमणिः, फालमणिः, औदुम्बरमणिः, जांगिडमणिः, शतवारमणिः एवम् असृतमणिः इत्यादि नानाविधानां मणीनां उल्लेखः विद्यते। तेषां मणीनां प्रयोगेण रोगनिवारणम्, चिरायुष्यप्राप्तिः, बल-पौरुषवृद्धिः एवं शत्रूणामुपरि विजयः च प्राप्यन्त इति अथर्ववेदे कथ्यते; यथा तत्र-

तमिमं देवता मणिं मह्यं ददतु पुष्टये ।
अभिभुं क्षत्रवर्धनं सपत्नदम्भनं मणिम् ॥[९]

एवं च-

अभीवर्तेन मणिना येनेन्द्रो अभिवावृधे ।
तेनास्मान् ब्रह्मणस्पतेऽभि राष्ट्राय वर्धय ॥[१०]
दीर्घायुत्वाय बृहते रणायारिष्यन्तो दक्षमाणाः सदैव ।
मणिं विष्कन्धदूषणं जङ्गिडं बिभृमो वयम् ॥[११]

एवं वेदेषु रत्न सम्बन्धो विचारः तत्र- तत्र दर्शिताः। ब्राह्मणेषु आरण्यकेषु अपि रत्नविज्ञानम् अन्तर्भूतम्। पञ्चविंशब्राह्मणेः, शतपथब्राह्मणेः च अस्य परामर्शाः दृष्टाः।

## स्मृतिसाहित्ये रत्नानां प्रतिपादनम्।

मनुस्मृतौ रत्नचौर्यनिन्दाप्रकरणे रत्नस्य चौर्यविषये कथ्यते-

मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च।
अयः कांस्योपलानाञ्च द्वादशाहं कणान्नता॥[१२]

अर्थात्, मणि- प्रवाल- मुक्ता- ताम्ररूप्यलोहकांस्योपलानां स्तेये द्वादशाहं तण्डुलभक्षणं कुर्यात् इति। रत्नस्य सर्वश्रेष्ठताप्रदर्शनाय मनुस्मृत्यां रत्नस्य महत्वम् कथयति-

स्त्रियो रत्नान्यथो विद्या धर्मः शौचं सुभाषितम्।
विविधानि च शिल्पानि समादेयानि सर्वतः ॥[१३]

## पुराणग्रन्थेषु रत्नानां प्रतिपादनम्।

पौराणिकसाहित्यमपि रत्नशास्त्रसम्बन्धविचारेण सम्पन्नं भवति। अग्निपुराण- गरुडपुराण- मत्स्यपुराण- विष्णुपुराणादिषु पुराणग्रन्थेषु रत्नविज्ञानपराः अध्यायाः अन्तर्भवन्ति। अग्निपुराणस्य षट्चत्वारिंशदधिकद्विशततमोऽध्यायः रत्नविज्ञानविषयकः भवति। तत्र वज्र- मरकत- पद्मराग- मौक्तिकादि चतुर्स्त्रिंशन्मितानां रत्नानां नामानि कथितानि। एतेषां रत्नानां वर्ण- आकृति- स्वरूप- उद्भवसम्बद्धाः विषयाः तत्र प्रतिपादिताः।

विधिवत् परीक्षितं शुद्धरत्नमेव ऐश्वर्यवर्धनाय धारयेदिति , तद्यथा-

अंतः प्रभत्वम् वैमल्यं सुसंथानत्वमेव च।
सुधारया नैव धार्यस्तु निष्प्रभा मलिनास्तथा॥ इति।[१४]

सुवर्णबद्धानां रत्नानां धारणं ऐश्वर्यवर्धनाय तथा सर्वत्र जयाय च उतमं भवतीति च तत्र कथ्यते-
'सुवर्णप्रतिबद्धानि रत्नानि श्रीजयादिके'[१५]इति।

अनन्तरं मरकत- वज्र- पद्मराग- मौक्तिक- इन्द्रनील- वैढूर्यादीनां श्रेष्ठजातीनां रत्नानां लक्षणं वर्ण्यन्ते। यथा, तत्र उतमवज्रस्य लक्षणं करोति-

अम्भस्तरति यद्वज्रमभेद्यं विमलं च यत् ।
षट्कोणं शक्रचापाभं लघु चार्कनिभं शुभम्॥[१६]

गरुडपुराणे अष्टषष्टितमाध्यायादारभ्य अशीतितमाध्यायपर्यन्तं रत्नसम्बद्धां विस्तृतां चर्चां कृता। तत्र वज्र- मौक्तिक- मरकत- पद्मराग- पुलक- रुधिराक्षादीनां द्वादशरत्नानां नामानि प्रदर्शितानि। यथा-

वज्रं मुक्तमणयः सपद्मरागः समरकताः प्रोक्ताः ।
अपि चेन्द्रनीलमणिवरवैढूर्य्याः पुष्परागाश्च ॥
कर्केतनं सपुलकं रुधिराख्यसमन्वितं तथा स्फटिकम्।
विद्रुममणिश्च यत्नादुद्दिष्टं संग्रहे तज्ज्ञैः ॥[१७]

एतेषां रत्नानाम् उत्पत्तिलक्षणाकृतिमूल्यवैशिष्ट्यादयः विस्तरेण पुराणेऽस्मिन् प्रतिपादिताः। परीक्षणप्रकारैः शुद्धान्येवेति निश्चितानि रत्नान्येव ऐश्वर्यकामेन धारयेयुरिति तत्र प्रतिपाद्यते।

परीक्ष्या परिशुद्धानां रत्नानां पृथिवीभुजा ।
धारणं संग्रहो वापि कार्य्याः श्रियमभीप्सता॥[१८]

तत्साकं कथयति यद् नीचलग्नेषु दिनेषु च प्राप्तानि रत्नानि दोषफलयुक्तानि भवन्ति इति।

कुलग्नेषुपजायन्ते यानि चोपहतेऽहनि।
दोषैस्तान्यपियुज्यन्ते हीयन्ते गुणसम्पदा॥[१९]

गरुडपुराणे वर्णाश्रमधर्मानुसारेणापि रत्नानि वर्गीकृतानि।[२०] यथा, शङ्खकुमुदस्फटिकवर्णयुक्तं वज्रं विप्रस्य, शशबभ्रुविलोचनाभं क्षत्रियस्य, कदलीदलवर्णं वज्रं वैश्यस्य, धौतकरवालसमानदीप्तं वज्रं शूद्रस्य च इति।

मत्स्यपुराणस्य रत्नाचलदानवर्णनं नाम नवतितमोऽध्यायः रत्नदानस्य महत्वं प्रतिपादयति। रत्नदानस्य विधिं वर्णयित्वा तत्र कथ्यते-

अनेन विधिना यस्तु दद्याद्रत्नमयम् गिरिम्।
स याति विष्णुसालोक्यममरेश्वरपूजितः ॥
यावत्कल्पशतं साग्रं वसेच्चेह नराधिप ।
रूपारोग्यगुणोपेतः सप्तद्वीपाधिपो भवेत् ॥ [२१]इति।

एवं च, ब्रह्माण्डपुराणे ललितासहस्रनामभागे देव्याः ललितायाः अङ्गानां लावण्यं विभिन्नैः रत्नैः तुलनां कृत्वा वर्ण्यते। विष्णुपुराणे विष्णोः हस्तः रत्नभूषितेन शोभमानमिति कथ्यते।[२२] पद्मपुराणे सीमन्तकमणिः, चूडामणिः इत्यादीनां प्रयोगः वर्तते।[२३]विष्णुधर्मोत्तरपुराणमनुसृत्य हीराररत्नस्य प्रदानेन इन्द्रलोके, पद्मरागस्य प्रदानेन सूर्यलोके, मरकतस्य प्रदानेन विष्णुलोके च दाता पूजितः भवेत् इति दृश्यते। मुक्ताफलदानेन वरुणलोकं स प्राप्नोतिति च। निकृष्टरत्नानि वर्ज्यानि इति च पुराणमिदं प्रस्तौति। यथा-

अप्रशस्तानि रत्नानि वर्जनीयानि दूरतः।
सर्वरत्नोत्तमं राजा विवर्णं मलिनं तथा॥[२४] इति।

**आयुर्वेदग्रन्थेषु रत्नानां प्रतिपादनम्।**

रत्नानि न केवलं आभरणरूपेण उपयुज्यन्ते, अपि तु तेषां विशेषशक्तिप्रभावेण विविधव्याधिशमनायाऽमपि इति पूर्वमेव प्रदर्शितम्। आयुर्वेदशास्त्रे तु रत्नचिकित्सा प्राधान्येन कल्पिता एव। अथर्ववेदे परामृष्टः विविधाः मणिप्रयोगाः रोगनिवारणार्थाः एव भवन्ति। यथा अथर्ववेदे 'शंखमणिः'[२५] इति कस्यचिन्मणेः वर्णनाय किमपि कृत्स्नं सूक्तमेव विद्यते। अयं मणिः सर्वरोगनाशकः तथा विश्वभेषजश्चेति तत्र कथ्यते।

आर्युवेदस्य प्रसिद्धे ग्रन्थे चरकसंहितायां भूमिजपदार्थे अन्यद्रव्याणां साकं केषाञ्चित् रत्नानामपि उल्लेखः कृतः। यथा-

सुवर्णं समलाः पञ्चलोहाः ससिकता च।
मनः शिलाले मणयो लवणं गौरिकाञ्जने भौममौषदमुद्दिष्टम्॥[२६]

महर्षिः चरकः चरकसंहितायां रत्नस्य स्पर्शं मङ्गलमयमिति गदति। यथा- नास्पृष्ट्वा रत्नाज्यपूज्यमंगलसुमनसोऽभिनिष्क्रामेत् ।[२७]

रत्नयुक्तानाम् आभरणानां धारणस्य फलमपि तत्र दर्शतयति-

धन्यं मंगलमायुष्यं श्रीमद्व्यसनसूदनम् ।
हर्षणं काम्यमोजस्यं रत्नाभरणधारणम् ॥[२८]

सुश्रुतसंहितायामपि निगद्यते यत् सप्त पदार्थाः मलिनं जलं निर्मलं कर्तुम् उपयोक्तव्याः इति। तत्र अन्यैः शोधकवस्तुभिः साकं गोमेदकस्य मुक्ताफलस्य च उल्लेखः कृतः।[२९]

एकैक रत्नस्य प्रत्येकं ओषधोपयोगमपि संस्कृतग्रन्थेषु लभ्यते । उदाहरणतया मरकतरत्नं विषजन्यरोगाणां शमनार्थमेव मुख्यतया प्रयुज्यते। रसरत्नसमुच्चये वाग्भटः ज्वरस्य तथा विषबाधायाः च शमनार्थं मरकतं गुणप्रदमेवेति कथ्यते-

ज्वरच्छर्दिविषश्वाससन्निपाताग्निमान्द्यनुत्।
दुर्नामपाण्डुशोफघ्नं ताक्ष्यर्मोजोविवर्धनम्॥[३०]

तथा च शरीरस्य ओजोवर्धनाय मरकतरत्नस्य धारणम् उत्तममेव। मानसोल्लासे मरकतस्य विषनाशकप्रभावं सूचयति यथा-

सेवालवल्लरीच्छायं सुरङ्गं त्रासवर्जितम् ।
अनर्घ्यं तं मरकतं प्राहुः सर्वविषापहम् ॥ इति।[३१]

सेवाललतायाः कान्तियुक्तं त्रासहीनं मरकतं सर्वविधविषनाशकं भवतीति सारार्थः।

**ज्योतिषग्रन्थेषु रत्नानां प्रतिपादनम् ।**

नवग्रहानां रत्नसम्बन्धमधिकृत्य विपुलम् अध्ययनं ज्योतिःशास्त्रे वर्तते। नवरत्नसङ्कल्पोऽपि तत्र विद्यते। नवग्रहकृतविघ्ननिवारणार्थम् एव अत्र रत्नानामुपयोगः। ज्योतिःशास्त्रपरे प्रमुखे ग्रन्थे बृहत्संहितायां ८०- ८३ तम अध्यायाः रत्नपरीक्षा प्रतिपादिता। आचार्य वराहमिहिरः तत्र द्वाविंशति रत्नानां नामानि प्रदर्शयति। अनन्तरं तेषां स्वच्छतां, गुणवत्ततां प्रति च कथयति-

रत्नानां शुभेन शुभं भवति नृपाणामनिष्टमशुभेन।
यस्मादतः परीक्ष्यं दैवं रत्नाश्रितं तज्ज्ञैः॥ इति।[३२]

रत्नपरीक्षा केन प्रकारेण करणीया इति बृहत्संहितायां वराहमिहिराचार्येण विस्तरेण प्रतिपादिता। तथा च रत्नानामुत्पत्तिविषये बृहत्संहिताकारः वराहमिहिरः सिद्धान्तत्रयं प्रदर्शयति-

रत्नानि बलाद्दैत्याद्दधीचितोऽन्ये वदन्ति जातानि।
केचित् भुवः स्वभावात् वैचित्र्यं प्राहुरुपलानाम्॥[३३]

अर्थात्, केषांचित् आचार्याणां मते रत्नानि बलनाम्नः असुरस्य शरीरात् उत्पन्नानि, अन्येषां तु केषांचित् आचार्याणां मते दधीचिमुनेः शरीरात्, इतरेषां मते तु पृथिव्याः स्वाभाविकपरिणामप्रकारैः एव रत्नानामुत्पत्तिः इति।

गरुडपुराणवत् बृहत्संहिताऽपि रत्नानि प्रतिवर्णं विभक्तानि।

रक्तं पीतं च शुभं राजन्यानां सितं द्विजातीनाम्।
शैरीषं वैश्यानां शूद्राणां शस्यतेऽसिनिभम्॥[३४]

अनन्तरं रत्नानां दोषाः अपि उच्यन्ते। कलुषाः, मन्ददयुतयः, लेखाकीर्णाः, सधातवः, खण्डाः, दुर्विद्धाः, न मनोज्ञाः, सशर्कराः इत्येते मणिदोषाः।[३५] रत्न-नक्षत्रयोः सम्बन्धः अपि तत्र प्रस्तूयते। यथा एकैकं रत्नं केन केन नक्षत्रेण प्रभावितं भवतीति विषये बृहत्संहितायाम् एवं दृश्यते-

पौष्णे सलिलजलफलकुसुमलवणमणिशंखमौक्तिकाब्जानि।
सुरभिकुसुमानि गन्धा वणिजो नौकर्णधाराश्च॥[३६]

अर्थात्, जलजपदार्थाः, कुसुमं, मणि, शंख- मौक्तिकादयः रेवतीनक्षत्रेण प्रभाविताः भवन्ति।

रत्नानां नवग्रहसम्बन्धः तु ज्योतिषशास्त्रे एवं लभ्यते-

माणिक्यं दिननायकस्य विमलं मुक्ताफलं शीतगो-
र्माहेयस्य च विद्रुमं मरतकं सौम्यस्य गारुत्मकम्।
देवेज्यस्य च पुष्परागमसुराचार्यस्य वज्रं च शनेः
नीलं निर्मलमन्ययोश्च गदिते गोमेदवैढूर्य्यके ॥[३७]

नवग्रहाणां प्रसन्नतायाः हेतुः तत्संबन्धिरत्नधारणम् एव भवतीति ज्योतिषशास्त्रग्रन्थे मुहूर्त्तचिन्तामण्यां परामृष्टमस्ति यद् ग्रहाणां तुष्ट्यै रत्नं धार्यम् [३८]इति।

**३. उपसंहारः**

महाभारत- रामायणादि इतिहासग्रन्थेषु अर्थशास्त्र- युक्तिकल्पतरु- देवीभागवत- दुर्गासप्तशती- भावप्रकाश- रसरत्नसमुच्चयमित्यादिषु अपि रत्नपराः परामर्शाः उपलभ्यन्ते। लौकिकसंस्कृतसाहित्ये अपि रत्नशब्दप्रयोगः बाहुल्येन द्रष्टुं शक्यते। कालिदासादीनां पञ्चमहाकाव्येषु, विविधेषु रूपकेषु अन्यकाव्येषु च रत्नशब्दप्रयोगाः विद्यन्ते। रत्नानां वर्णम्, तेषाम् अमूल्यता, महत्वम् इत्यादयः सविशेषताः मुख्यतया उपमाप्रयोगाय कवयः स्वकाव्येषु प्रयुजितमस्ति । न केवलं प्राचीनग्रन्थाः अपि च नूतनाः अनेके ग्रन्था अपि रत्नशास्त्रे विरचिताः भवन्ति। राधाकृष्णपराशरस्य 'रत्नविज्ञानम्', सुरेन्द्रकुमारपाण्डेयस्य 'रत्नविमर्शः', नारायणपण्डितस्य 'नवरत्नपरीक्षा' इत्येते ग्रन्थाः रत्नशास्त्रमधिकृत्य विरचिताः नूतनग्रन्थाः भवन्ति।

**तथ्यसूत्रम्**

१.निरुक्तम् ७/१५
२.उणादिकोशम् ३/१४
३.भावप्रकाशम् १५१
४.अमरकोशं २/९/९३
५.ऋग्वेदम् १/१/१
६.तत्रैव६/७४/१
७. तत्रैव १/१२५/१
८. तत्रैव १/९१/१
९.अथर्ववेदं १०/६/२९
१०. तत्रैव १/२९/१
११. तत्रैव २/४/१
१२. मनुस्मृतिः ११/१६७
१३. तत्रैव २/२४६
१४.अग्निपुराणम् २४६/७-८
१५.अग्निपुराणम् २४६/७
१६. तत्रैव २४६/९
१७.गरुडपुराणम् ६८/९-१०
१८. तत्रैव ६८/१३
१९. तत्रैव ६८/१२
२०. तत्रैव ६८/२२
२१.मत्स्यपुराणम् १०/८
२२विष्णुपुराणं २/४/६
२३.पद्मपुराणं ३६/७, ७१/६५
२४.विष्णुधर्मोत्तरपुराणम् २/१५/२५
२५.अथर्ववेदम् ४/१०
२६.चरकसंहिता १/६८
२७. तत्रैव ८/२२
२८. तत्रैव ५/९१
२९.सुश्रुतसंहिता ९५/१७
३०.रसरत्नसमुच्चयं५/२२
३१.मानसोल्लासम् ४/५१८
३२.बृहत्संहिता ८०/१
३३बृहत्संहिता ८०/३
३४. तत्रैव ८०/११
३५. तत्रैव ८२/४
३६. तत्रैव १५/२४
३७.जातकपारिजातः २/२१
३८.मुहूर्त्तचिन्तामणिः ४. १०, ११

**सहाय्यकग्रन्थाः** संस्कृते-


- *अग्निमहापुराणं। (वा. ३).*मैत्रेयी देश्पाण्डे. न्यूभारतीय बुक्पोपरेषन्. दिल्ली. २००९
- *अथर्ववेदसंहिता( वो. २).* जोषि के.एल् (सम्पा.). परिमल्प्रकाशन्. दिल्ली. २०००
- *अमरकोशम्.* भानुजीक्षित. चौखम्बा-संस्कृत-प्रकाशन्. दिल्ली. २००७
- *उणादिकोशः.* राष्ट्रीयसंस्कृतविद्यापीठम्. तिरुप्पति. २००४
- *गरुडमहापुराणम्।( वा. २).* जेन्एस्. (सम्पा.). न्यूभारतीय बुक्कोपरेषन्. दिल्ली. २००७
- *चरकसंहिता.* वैद्य जादवाजि त्रिकाम्जि आचार्य. चौखम्भा संस्कृत संस्थान. वाराणसी. १९९४
- *जातकपारिजातः.* गोपेशकुमार: ओंफा (भाष्याकारः). मोत्तिलाल् बनार्सि पब्लिकेषन्स्. दिल्ली.१९८१
- *दयानन्दनिरुक्ति- व्युत्पत्तिकोश.* डा.रूप किशोर्शास्त्री. डा. सूर्यप्रकाश स्नातक निर्देशक. दिल्ली. २००३
- *बृहत्संहिता.* रामकृष्णभट्ट( सम्पा.). मोत्तिलाल् बनार्सिदास् पब्लिकेषन्स्. दिल्ली.१९८२
- *रत्नविज्ञानम्.* राधाकृष्ण पराशरः. चौखाम्बा भारती अकादमी. वाराणसी. १९९८
- *रसरत्नसमुच्चयम्* (वो.१). डा. अशोक्.डि.सत्पुत् (translator). चेतन्प्रकाशन्. मैसूर्. १९९०